पुराणेषु सांख्ययोगवेदान्तविमर्शः

# शोधमहानिबन्धसारः

# Synopsis

एम. एस. युनिवर्सिटी बडौदा

विनयनविद्याशाखायाः पीएच. डी. (विद्यावारिधिः) इत्युपाधये

प्रस्तोष्यमाणः शोधमहानिबन्धसारः

## विषयः

पुराणेषु सांख्ययोगवेदान्तविमर्शः

**प्रस्तोता**

उपाध्याय गिरधर

(पुराणाचार्यः)

M.9879594144

**मार्गदर्शकः**

डॉ. हरिप्रसाद पाण्डे

संस्कृतविभागाध्यक्षः

एम. एस. युनिवर्सिटी-बडौदा

गुजरातराज्यम्

दिनाङ्कः २०/०१/२०१७ स्थलम्

# ।। घोषणापत्रम् ।।

अहं 'उपाध्याय गिरधरः' इति नामकः शपथपूर्वकमिदमुद्घोषयामि यत् 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति विषयाधारितं प्रकृतशोधमहानिबन्धरूपात्मकमिदं शोधकार्यं मया समुल्लिखितसन्दर्भग्रन्थसहायकसामग्रीसमुच्चयानुसारमेव कृतम् । शोधमहानिबन्धेऽस्मिन् कृतं सम्पूर्णविषयनिरूपणं सर्वतोभावेन मौलिकं विद्यते, अतः तस्या मौलिकताया विश्वासपूर्वकमहमुद्घोषणाङ्करोमि, तत इदमप्यमहमुद्घोषयामि यत्प्रस्तुतशोधमहानिबन्धे सन्निरूपितविषयान् विचारानेवं सर्वविवरणम्प्रति चाहं स्वयमेवोत्तरदायी अस्मि ।

स्थलम्

दिनाङ्कः - २०/०१/२०१७

विदुषामाश्रवः

उपाध्याय गिरधर

(पुराणाचार्यः)

M.9879594144

# शोधनिर्देशकस्य प्रमाणपत्रम्

अनेन प्रमाणीक्रियते यद् ‘उपाध्याय गिरधरः’ इति शोधछात्रेण प्रस्तुतोऽयं ‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’ इति विषयमधिकृत्य विद्यावारिधिः [ Ph. D. ] इत्युपाधये महाशोधप्रबन्धः परिश्रमेण निष्ठया च गाम्भीर्यपूर्वकं कृतः । महाशोधप्रबन्धोऽयमभिनवशैल्या अस्माकं निर्देशने सप्रयत्नेन मौलिकरूपेण सम्पन्नः कृतः, एवमस्मद्ज्ञान एतद्विषयमधिकृत्य अन्येषु विश्वविद्यालयेषु एतादृशं शोधकार्य्यन्न जातम् ।

स्थलम् -

दिनाङ्कः २०/०१/२०१७

शोधनिर्देशकः

डॉ. हरिप्रसाद पाण्डे

संस्कृतविभागाध्यक्षः

एम. एस. युनिवर्सिटी-बडौदा

गुजरातराज्यम्

# विषयानुक्रमणिका

प्रकरणम् १ प्रास्ताविकम् ।

१.१ चत्वारो वेदाः ।

१.२ वेदानामुपादेयता ।

१.३ षड्दर्शनानां परिचयः ।

१.४ दर्शनग्रन्थानामुपादेयता ।

१.५ सांख्यदर्शनस्य परिचयः ।

१.६ वेदाङ्गानां परिचयः ।

१.७ वेदाङ्गानामुपादेयता ।

१.८ उपसंहारः ।

**प्रकरणम् २ पुराणानां परिचयः ।**

२.१ प्रास्ताविकम् ।

२.२ पुराणानामाविर्भावः ।

२.३ इतिहासपुराणयोर्मध्ये भेदः ।

२.४ पुराणानां लक्षणानि ।

२.५ पुराणस्य दशलक्षणकत्वम् ।

२.६ पुराणानां प्रकारप्रकल्पनम् ।

२.७ महापुराणानां क्रमः ।

२.८ उपपुराणानां विवेचनम् ।

२.९ औपपुराणानां विवेचनम् ।

२.१० पुराणानां विषयाः ।

२.१०.१ आख्यानोपाख्यानानि ।

२.१०.२ गाथाः ।

२.१०.३ कल्पशुद्धिः ।

२.११ पुराणसंहिता - पुराणमितिहासश्च।

२.१२ पुराणानां श्लोकसंख्या ।

२.१३ पुराणेषु वर्ण्यविषयः ।

**प्रकरणम् ३ सांख्ययोगवेदान्तपदस्य निर्वचनम् ।**

३.१ प्रस्तावना ।

३.२ सांख्यपदस्य निर्वचनम् ।

३.३ सांख्यपदस्य विविधा अर्थाः ।

३.४ सांख्यमेव योगः ।

३.५ वेदान्तपदस्य निर्वचनम् ।

३.६ विमर्शपदस्य निर्वचनम् ।

३.७ सांख्यदर्शनस्य कर्तृपरिचयः ।

३.८ सांख्यदर्शनस्य भाष्यकाराः ।

३.९ सांख्यदर्शनस्य वर्ण्यविषयः ।

३.१० सांख्यदर्शनस्य लोकोपयोगिता ।

**प्रकरणम् ४ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

४.१ प्रस्तावना ।

४.२ पुराणेषु सांख्यीयतत्त्वपरिगणनम् ।

४.३ पुराणेषु प्रमाणविषयविवेचनम् ।

४.४ पुराणेषु सत्कार्य्यवादः ।

४.५ पुराणेषु गुणनिरूपणम् ।

४.६ पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माः ।

४.७ पुराणेषु प्रकृतिपरिणामः ।

**प्रकरणम् ५ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

५.१ प्रस्तावना ।

५.२ पुराणेषु पुरुषसिद्धिः।

५.३ पुराणेषु पुरुषबहुत्ववादः ।

५.४ पुराणेषु पुरुषधर्म्माः ।

५.५ पुराणेषु सृष्टिव्यवस्था ।

५.६ पुराणेषु बुद्धिस्वरूपम् ।

५.७ पुराणेषु अहङ्कारस्वरूपम् ।

**प्रकरणम् ६ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

६.१ प्रस्तावना ।

६.२ पुराणेषु इन्द्रियसर्गः ।

६.३ पुराणेषु शून्यवादनिरासः ।

६.४ पुराणेषु गतिकर्मबन्धकारणतानिरासः ।

६.५ पुराणेषु अविद्याखण्डनम् ।

६.६ पुराणेषु सृष्टिप्रयोजनम् ।

६.७ पुराणेषु विवेककृतकृत्यता ।

**प्रकरणम् ७ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

७.१ प्रस्तावना ।

७.२ पुराणेषु उपासनाफलम् ।

७.३ पुराणेषु जीवन्मुक्तशरीरावस्थानम् ।

७.४ पुराणेषु वेदानां स्वतःप्रामाण्यम् ।

७.५ पुराणेषु शरीरपञ्चभूतत्वनिरासः ।

७.६ पुराणेषु मोक्षब्रह्मरूपता ।

७.७ पुराणेषु देहविभागः ।

७.८ पुराणेषु आत्मसिद्धिः ।

७.९ पुराणेषु बन्धमोक्षकारणम् ।

७.१० पुराणेषु पुरुषबहुत्वव्यवस्था ।

७.११ पुराणेषु ज्ञानमेव मुक्तिकारणम् ।

७.१२ पुराणेषु अदृष्टकारणनिराकरणम् ।

७.१३ पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् ।

७.१४ पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम् ।

७.१५ पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् ।

**प्रकरणम् ८ सांख्यदर्शनस्य महिमा ।**

८.१ सांख्यदर्शनस्य स्रोतः ।

८.२ सांख्यदर्शनस्य परम्परा ।

८.३ सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः ।

८.४ सांख्यदर्शनस्य तत्त्वविवेचनम् ।

८.५ सांख्यदर्शनेनैव भगवत्प्राप्तिः ।

८.६ सांख्यदर्शनेनैव भवबन्धनमुक्तिः ।

८.७ सांख्यदर्शनेनैव इष्टसिद्धिः ।

प्रकरणम् ९ उपसंहारः ।

- सङ्केताक्षरसूची ।
- सन्दर्भग्रन्थसूची {Bibliography} ।

# शोधप्रबन्धसारः

## विषयः पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

गजाननं नमस्कृत्य शारदाञ्च तथैव च ।
शोधप्रबन्धसारं च विषयस्य लिखाम्यहम् ।।

## (१) प्रथमं विधानम् –

**प्रस्तुतेऽस्मिन् शोधमहानिबन्धे कृतं शोधकार्यं ज्ञानक्षितिजस्य विशिष्टमौलिकताप्रदानपूर्वकं यथाविस्तरणं करोति, तत्सम्बद्धं प्रथमं विधानम् –**

तस्य श्रुतस्य मननार्थमथोपदेष्टुं
सद्युक्तिजालमिह सांख्यकृदाविरासीत् ।
नारायणः कपिलमूर्त्तरशेषदुःख-
हानाय जीवनिवहस्य नमोऽस्तु तस्मै[1] ।।

श्रुतिस्मृती तु नेत्रे द्वे पुराणं हृदयं स्मृतम् ।
श्रुतिस्मृतिभ्यां हीनोऽन्धः काणः स्यादेकया विना ।।
पुराणहीनाद्धृच्छून्यात्काणान्धावपि तौ वरौ ।
श्रुतिस्मृत्युदितो धर्मः पुराणे परिगीयते ।।
यस्य धर्मेऽस्ति जिज्ञासा यस्य पापाद्भयं महत् ।
श्रोतव्यानि पुराणानि धर्ममूलानि तेन वै ।।
चतुर्दशसु विद्यासु पुराणं दीप उत्तमः ।
अन्धोऽपि न तदालोकात्संसाराब्धौ क्वचित्पतेत्[2] ।।

तत्राधिभौतिकाध्यात्मिकाधिदैविकसकलदुःखाऽपहारकस्य कर्मोपासनाया जीवब्रह्मैक्यज्ञानेनाऽभ्युदयनिःश्रेयःसिद्धिहेतुकस्य धर्मस्य मूलभूता वेदाः सन्ति, अतो मनुस्मृतिकारः कथयति यद् –

---

[1] सांख्यप्रवचनभाष्य १।३

[2] कल्याण–पुराणकथाङ्क–पृष्ठसंख्या–८

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च[1] ।।

श्लोकस्याऽस्य भावो वर्तते, यत्समस्तर्ग्यजुःसामाथर्वलक्षणो विध्यर्थवादमन्त्रस्वरूपो वेदो धर्मे प्रमाणम् । अर्थवादानामपि विध्येकवाक्यत्वेन स्तावकतया धर्मे प्रामाण्यात् । वेदविदां स्मृतिधर्मे प्रमाणम् । वेदविदामिति विशेषणदानेन वेदमूलत्वेन स्मृत्यादीनां प्रामाण्यमिति तात्पर्यम् । इष्टप्राप्ति-अनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' । अतिगभीरस्य वेदस्य शब्दानां " अङ्ग्यन्ते ज्ञायन्ते वेदा अमीभिरिति अङ्गानि, अगि गतौ[2] अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि, अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषदि कथितं यत् – '' द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति[3] '' परा चैवाऽपरा च, तत्राऽपरा ऋग्वेदः, यजुर्वेदः, सामवेदोऽथर्ववेदः, तेषां ज्ञानाय वेदपुरुषस्य ज्ञानाय चत्वार्य्यङ्गानि सन्ति, यथा – शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्यौतिषमिति, तद्यथा पाणिनीयशिक्षायाम् –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[4] ।।

तदनन्तरं दृश्यत ईश्वरोऽनेन तदिति दर्शनम् , अतो वेदपुरुषस्य दर्शनार्थं वा ज्ञानार्थं षड् दर्शनानि सन्ति, तेषु षट्सु दर्शनेषु सांख्यदर्शनं हृदि निधाय 'व्यासोच्छिष्टं जग्त्सर्व्वम्' इत्यनुसारं पुराणमेव वास्तविकदृष्ट्या भारतस्येतिहासो वर्तते, तेष्वेव भारतीयजीवनस्यादर्शस्य, भारतीयसभ्यतायाः, संस्कृतेस्तथा भारतीयस्य

---

1 मनुस्मृतिः १।९.
2 भ्वादि..१५०
3 मुण्डकोपनिषद्
4 पाणिनीयशिक्षा

विद्यावैभवस्य वास्तविकं ज्ञानं प्राप्तुं शक्नोति, अतः पुराणेषु यज्ज्ञानमस्ति, तदेव ज्ञानमन्यत्र वर्तते, एतेषु यज्ज्ञानन्नास्ति, तज्ज्ञानमन्यत्र नास्ति, अतो लिखितमस्ति यद् –

पुराणं सर्वतीर्थेषु तीर्थं चाधिकमुच्यते ।
यस्यैकपादश्रवणाद्धरिरेव प्रसीदति[1] ।।
इतिहासपुराणैस्तु निश्चयोऽयं कृतः पुरा ।
यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ ।
उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते[2] ।।
पापं संक्षीयते नित्यं धर्मश्चैव विवर्धते ।
पुराणश्रवणाज्ज्ञानी न संसारं प्रपद्यते[3] ।।

इत्थं श्रीव्यासेन विरचितेषु 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मम शोधमहानिबन्धस्य विषयं स्मारं स्मारं ध्यायं ध्यायं च समेषु पुराणेषु सांख्ययोगवेदान्तस्य विमर्शन्नाम परिशीलनं चिन्तनमभ्यासं करोमि, शोधमहानिबन्धसारेऽस्मिन् मया सरला सुबोधा हृद्या च संस्कृतभाषा प्रयुक्ता । अत्राऽहं विविधसन्दर्भग्रन्थानां समालोचनेन सम्पूर्णसर्वग्राहकं विवेचनात्मकञ्च संशोधनकार्यार्थं यथाशक्यप्रयत्नं कृतवानस्मि । प्रस्तुतोऽयं शोधमहानिबन्धसारो नूतनदिशासूचको विशिष्टाधिगमान्वितोऽस्ति, तथा च विविधसंशोधनकार्येषु ममायं प्रयत्नः सांख्यजिज्ञासूनां पुराणज्ञानपिपासूनां च कृते नूतनदिशाप्रदः सिद्धो भविष्यति । श्रीमता व्यासेन निर्दिष्टमार्गमनुस्मरन्नहं मम मनसि स्थितं लक्ष्यमवश्यमेव प्राप्स्यामीत्याशान्वितोऽस्मि । तथा च ममायमायासः सर्वथा सांख्यदर्शनजिज्ञासूनां तथा पुराणान्यधीयते विदन्ति, तेषां पौराणिकानाञ्च कृत महानुपकारको लोकोपकारकश्च भूयादिति मे अभ्यर्थना ।

---

[1] पद्मपु.-स्वर्गखण्डः-६२।५९
[2] कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-८
[3] कल्याण-पुराणकथाङ्क-पृष्ठसंख्या-९

## (२) द्वितीयं विधानम्

**शोधमहानिबन्धस्यास्य वैशिष्ट्यप्रतिपादकं द्वितीयं विधानम् ।**

## प्रकरणम् १ विषयवस्तुविवेचनम् ।

प्रकरणम् १ प्रास्ताविकम् ।

विस्ताराय च वेदानां स्वयं नारायणप्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले[१] ।।

१.१ चत्वारो वेदाः ।

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।

अतिगभीरस्य वेदस्य शब्दानां " अङ्ग्यन्ते ज्ञायन्ते वेदा अमीभिरिति अङ्गानि, अगि गतौ[२] अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि, अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषदि कथितं यत् – '' द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति[३] '' परा चैवाऽपरा च, तत्राऽपरा ऋग्वेदः, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्यौतिषमिति । '' अथ परा यया तदक्षरमधिगम्यते[४] '' उपनिषद्वेदाऽक्षरविषयं हि विज्ञानमिह, परा विद्येति प्राधान्येन विवक्षितं नोपनिषच्छन्दराशिरिति तात्पर्यम् पराविद्यायाः । तदनन्तरं वैदिकसाहित्ये पुराणानामतीव गौरवास्पदं स्थानमस्ति ।

१.२ वेदानामुपादेयता ।

१.३ षड्दर्शनानां परिचयः ।

१.४ दर्शनग्रन्थानामुपादेयता ।

१.५ सांख्यदर्शनस्य परिचयः ।

---

1 मत्स्यपुराणम् ५।२

2 भ्वादि..१५०

3 मुण्डकोपनिषद्

4 मुण्डकोपनिषद् १।१।४।

१.६ वेदाङ्गानां परिचयः ।

१.७ वेदाङ्गानामुपादेयता ।

१.८ उपसंहारः ।

अत्र प्रथमे प्रकरणे प्रदत्तानां सप्तानामुपप्रकरणानां विस्ताररूपेण प्रदत्तो वर्तते, अतो विस्ताररूपेण चर्चान्न करोमि ।

## प्रकरणम् २ पुराणानां परिचयः ।

### २.१ प्रास्ताविकम् ।

पुराणम् - पुरा भवं भवति नेदानीम् । जीर्णं हि पुराणमुच्यते । पुरानवशब्दस्य व-लोपेन णत्वेन च पुराणम्भवति[१] । पुराणन्नाम प्राचीनत्वेऽपि यस्य नव्यत्वं नितरामस्ति तदेव पुराणं बोध्यते ।

(१) पुरा भवमिति विग्रहे पुराशब्दात् 'सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्यु- ट्युलौ तुट् च[२]' इति सूत्रेण ट्युप्रत्यये, टकारस्येत्संज्ञायां लोपे च पुरा + यु इति स्थिते, 'युवोरनाकौ[३]' इति सूत्रेण 'यु' इत्यस्य स्थाने अनादेशे पुरा + अन इति स्थिते, अत्र 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन[४]' इत्यस्मिन् सूत्रे 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु[५]' इत्यस्मिन् सूत्रे च पुराणशब्ददर्शनात् 'सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्यु- ट्युलौ तुट् च[६]' इति सूत्रेण प्राप्तः तुडभावो निपात्यते, वर्णसम्मेलने पुराणशब्दो निष्पद्यते ।

---

1 निरुक्तभाष्यटीकायाम् ३।१९।४

2 पा. सू. ४।३।२३

3 पा. सू. ७।१।१

4 पा. सू. २।१।४

5 पा. सू. ४।३।१०५

6 पा. सू. ४।३।२३

(५) पुरा अतीतान् अणति, अण्यते नाम कथयति जीवयति इति विग्रहे अण शब्दे[१], अण प्राणने[२] इति धातोः ग्रन्थविशेषं सूचयन् पुराणशब्दः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः[३]' इत्यनेन अच्प्रत्ययेऽनुबन्धलोपे स्वादिकार्ये पुराणशब्दो निष्पद्यते ।

२.२ पुराणानामाविर्भावः ।

वैदिकसाहित्यस्य पर्यालोचनेन विज्ञायते यत्पुराणानि अतिप्राचीनकालतः प्रचलितानि वर्तन्ते । एषां च वेदमूलकत्वं तद्विशेषज्ञाः समानन्ति, यथा –

ऋचः सामानि च्छन्दांसि पुराणं यजुषा तथा ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः[४] ।।

२.३ इतिहासपुराणयोर्मध्ये भेदः ।

निरुक्तकारो यास्काचार्य्य इतिहासशब्दस्य व्याख्यामनेन प्रकाररेण करोति, तद्यथा –

निदानभूतम् इति ह एवमासीत यः कथ्यते स इतिहासः[५] ।

अर्थाद् इति + ह + आसः इति नाम एवं प्रकारेण ह नाम निश्चितरूपेण, आसः नाम वर्तमान आसीत् । तर्हि तस्यैवेतिहासशब्दस्य पुरावृत्तत्वेन अमरकोशकारस्य महाभारतकारस्य च प्रतिपादनं न तावद् अयुक्तियुक्तं भवति, यथा –

इतिहासः पुरावृत्तम्[६] ।

पुराणम् पुरावृत्तम्[७] ।

---

1 भ्वादिधातुः ४७४
2 दिवादिधातुः १२५१
3 पा. सू. ३।१।१३४
4 अथर्ववेदः ११।७।२४
5 निरुक्तभा. टीका, मा. भा. २।१०।३
6 अमरकोशः १।५
7 म. भा. आदिपर्व. नीलकण्ठीटीका

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

यद्यपि तद् इतिवृत्तम् अर्थशास्त्रे साधारणतया इतिहासार्थेन उपलब्धं भवति तथापि स्थलविशेषे वेदेषु विशेषतः, अथर्ववेदे पुराणात् स्वतन्त्ररूपेण उपलब्धितोऽस्ति, तथापि उभयोर्मध्ये भेदोऽस्ति यथा –

पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रं चेति इतिहासः[1] ।

२.४ पुराणानां लक्षणानि ।

पुराणानां पञ्चलक्षणमेव प्रसिद्धमस्ति यस्य प्रामाण्यं विविधेषु कोशेषु समुपलभ्यते तद्यथा –

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्[2] ।।

तत्र पञ्चलक्षणेषु सर्ग – प्रतिसर्ग – वंश – मन्वन्तरवंशानुचरितानि एव अन्तर्भवन्ति । इत्थं प्रतिपादकं वचनं बहुषु प्रसिद्धेषु पुराणेषु समुपलभ्यते ।

२.५ पुराणस्य दशलक्षणकत्वम् ।

पुराणं पञ्चलक्षणम् इत्यतः किमपि विलक्षणं पुराणे समुपलभ्यते । तत्रैवं लक्षणप्रतिपादकेषु श्रीमद्भागवतपुराणस्य स्थलद्वये समुपलब्धेषु लक्षणेषु मूलतः प्रायः साम्यमस्ति यथा –

अत्र सर्गो विसर्गश्च स्थानं पोषणमूत्तयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः[3] ।।
सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः[4] ।।

नामतो वैषम्यं दृष्टिगोचरीचूतं भवति । अत्र केवलं शब्दभेदं विना अभिप्रायभेदः परिलक्ष्यते यथा –

---

1 कौटिल्यार्थशास्त्रम् ५।१४
2 मत्स्यपुराणम्. ५३।६३
3 श्री. भा. पुराणम् २।१०।१
4 श्री. भा. पुराणम् १२।७।९

| क्रमः | द्वितीयस्कन्धलक्षणम् | द्वादशस्कन्धलक्षणम् |
|---|---|---|
| (१) | सर्गः | सर्गः |
| (२) | विसर्गः | विसर्गः |
| (३) | स्थानम् | वृत्तिः |
| (४) | पोषणम् | रक्षा |
| (५) | ऊतिः | हेतुः |
| (६) | मन्वन्तरम् | अन्तरम् |
| (७) | ईशानुकथा | वंशवंशानुचरिते |
| (८) | निरोधः | संस्था - |
| | | नित्यप्रलयः |
| | | नैमित्तिकप्रलयः |
| | | प्राकृतिकप्रलयः |
| (९) | मुक्तिः | संस्था - आत्यन्तिकप्रलयः |
| (१०) | आश्रयः | आश्रयः |

ब्रह्मवैवर्तपुराणेऽपि पुराणस्य दशलक्षणकत्वमनेन प्रकारेण प्रतिपादितं वर्तते यथा -

सृष्टिश्चापि विसृष्टिश्च स्थितिः तेषां च पालनम् ।
कर्मणां वासना वार्ता मनूनां च क्रमेण च ।।
वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।
उत्कीर्तनं हरेरेव देवानां च पृथक् पृथक् ।।
दशाधिकं लक्षणं च महतां परिकीर्तनम्[1] ।।

ब्रह्मवैवर्तपुराणस्य मतानुसारं पुराणस्य दशलक्षणान्यनेन प्रकारेण भवितमर्हन्ति

[1] ब्रह्मवैवर्तपुराणम् , श्रीकृष्णखण्डः १३१।८८-९०

२.६ पुराणानां प्रकारप्रकल्पनम् ।

पूर्वप्रतिपादितद्विविधलक्षणानुसारं यद्यपि पुराणानां महापुराणानाम् उपपुराणानां च भेदेन प्रकारद्वयं परिकल्पितं तथापि तयोर्मध्ये नास्ति भेदः । साधारणतः पुराणानां प्रकारत्रयमस्ति तद्यथा –

(१) महापुराणम् ।

(२) उपपुराणम् ।

(३) औपपुराणम् ।

संख्यागणनाप्रसङ्गे प्रत्येकस्य अष्टादशसंख्यागणना वर्तते, किन्तु केषाञ्चिद्विदुषां मतानुसारं समेषां पुराणानां पञ्चप्रकाराणि पुराणानि सन्ति तद्यथा –

(१) महापुराणानि ।

(२) उपपुराणानि ।

(३) औपपुराणानि ।

(४) उपोपपुराणानि ।

(५) उपौपपुराणानि ।

किन्तु संख्यागणनावसरे मत्स्यपुराणस्य मतानुसारमेकमेव पुराणं वर्तते यथा –

पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघः ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम्[1] ।।

अनेन प्रकारेण 'पुराणानां प्रकारप्रकल्पनम्' इति प्रतिपाद्योपप्रकरणमिदं विस्तारभयात् समाप्यते ।

२.७ महापुराणानां क्रमः ।

यस्मात् पुराह्यनक्तीदं पुराणं तेन कथ्यते ।
निरुक्तिमस्य यो वेदः सर्वपापैः प्रमुच्यते[1]।।

---

[1] मत्स्यपुराणम् ५।३४

अस्मिन् देवीभागवते पुराणगणनायाः प्रसङ्गे महापुराणानां त्वेवं क्रमो प्रदत्तः, यथा -

म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम् ।

अ-ना-प-लिं-ग-कू-स्कानि पुराणानि प्रचक्षते[2]।।

२.८ उपपुराणानां विवेचनम् ।

अष्टादशमहापुराणवद् महर्षिवेदव्यासेन अष्टदशोपपुराणान्यपि निर्मापितानि सन्ति, तेषामुपपुराणानां नामगणना अनया रीत्या महर्षिणा कृता वर्तते यथा -

(१) आदिपुराणम् । (२) नृसिंहपुराणम् ।

(३) स्कन्दपुराणम् । (४) शिवधर्मपुराणम् ।

(५) दुर्वासःपुराणम् । (६) नारदीयपुराणम् ।

(७) कपिलपुराणम् । (८) वामनपुराणम् ।

(९) औशनसपुराणम् । (१०) ब्रह्माण्डपुराणम् ।

(११) वरुणपुराणम् । (१२) कालिकापुराणम् ।

(१३) माहेश्वरपुराणम् । (१४) शाम्बपुराणम् ।

(१५) सौरपुराणम् । (१६) पराशरपुराणम् ।

(१७) मारीचपुराणम् । (१८) भास्करपुराणम् ।

२.९ औपपुराणानां विवेचनम् ।

यथाष्टादशमहापुराणानि, अष्टादशोपपुराणानि महर्षिवेदव्यासेन विवेचितानि सन्ति, तथैव अष्टदशौपपुराणान्यपि निर्मापितानि सन्ति, तेषामौपपुराणानां नामगणना अनया रीत्या महर्षिणा कृता वर्तते यथा -

---

[1] विष्णुपुराणम्

[2] सं. निबन्धावली

| | | | |
|---|---|---|---|
| (१) | सनत्कुमारपुराणम् । | (२) | बृहन्नारदीयपुराणम् । |
| (३) | आदित्यपुराणम् । | (४) | सूर्यपुराणम् । |
| (५) | नन्दिकेश्वरपुराणम् । | (६) | कौर्मपुराणम् । |
| (७) | भागवतपुराणम् । | (८) | वसिष्ठपुराणम् । |
| (९) | भार्गवपुराणम् । | (१०) | मुद्गलपुराणम् । |
| (११) | कल्किपुराणम् । | (१२) | देवीपुराणम् । |
| (१३) | महाभागवतपुराणम् । | (१४) | बृहद्धर्मपुराणम् । |
| (१५) | परानन्दपुराणम् । | (१६) | वह्निपुराणम् । |
| (१७) | हरिवंशपुराणम् । | (१८) | पशुपतिपुराणम् । |

२.१० पुराणानां विषयाः ।

पुराणानां कानि स्रोतांसि येषामाधारेण भगवता श्रीवेदव्यासेन तेषां प्रणयनं कृतमिति विशिष्टायां जिज्ञासायामिदमुच्यते यत् – पुराणतत्त्ववेत्ता महर्षिः वेदव्यासः चतुर्णामाख्यानानाम् , उपाख्यानानाम् , गाथानाम् , कल्पशुद्धीनां चोपकरणानामाशयमादाय अष्टादशपुराणानां रचनां चक्रे तद्यथा –

आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थं विशारदः[1] ।।

२.१०.१ आख्यानोपाख्यानानि ।

स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः ।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते[2] ।।

२.१०.२ गाथाः ।

अज्ञातकर्तॄणां लोकेषु प्रख्यातानां केषाञ्चिन्महापुरुषाणां वैशिष्ट्यबोधकानां श्लोकानां संज्ञा गाथा इति कथ्यते । प्राचीनसाहित्येषु अनेकान्येवंविधानि प्राचीनानि पद्यानि समुपलभ्यन्ते, येषां कर्तॄणां नामानि नोपलभ्यन्ते,

---

1 अ. पुराणदर्पणम् २५

2 म. भा. आदिपर्व ८५।१२

यानि केषाञ्चिन्महामान्यमहीपतीनां प्रशंसायामसामान्ये शौर्ये दानमहिम्नि च प्रतिपादितानि सन्ति । ईदृशाज्ञातकर्तृकाः परम्परया प्रचलितलोके प्रख्याताः श्लोका गाथेति पदेनोच्यन्ते ।

२.१०.३ कल्पशुद्धिः ।

कल्पशुद्धिशब्दस्य तात्पर्यनिर्णये विदुषां मतमस्ति यत्पारस्परिको भेदपरकः । केचन विद्वांसः कल्पशुद्धिशब्दस्य स्थाने कल्पजोक्तिरिति पाठं मत्वा विभिन्नेषु कल्पेषूत्पद्यमानानां पदार्थानां विवरणमित्यर्थं कुर्वन्ति । श्रीधरस्वामिना तु कल्पशुद्धिरित्यस्यार्थः श्राद्धकल्पः इति कृतो वर्तते । पण्डितवर्याणां मधुसूदनोझामहोदयानां मते कल्पशुद्धिशब्देन धर्मशास्त्रस्य सर्वे विषया अभीष्टाः सन्ति । कल्पस्य तात्पर्यं 'वेदाङ्गमः' इति मन्यते ।

अथ श्रौत-गृह्य-धर्मसूत्र-सदाचारसंस्कारा अन्तर्भवन्ति । शुद्धिपदेन षड्विधा शुद्धिर्भवति यथा -

(१) मलशुद्धिः ।

(२) स्पर्शशुद्धिः ।

(३) अघशुद्धिः ।

(४) एनःशुद्धिः ।

(५) आत्मशुद्धिः ।

(६) मनःशुद्धिः ।

२.११ पुराणसंहिता - पुराणमितिहासश्च।

२.१२ पुराणानां श्लोकसंख्या ।

एतेषामष्टादशपुराणेषु प्रत्येकस्मिन् पुराणे कति श्लोकाः ? इति जिज्ञासाऽनेन प्रकारेण शान्ता भवति ।

| क्रमः | पुराणनाम | श्लोकसंख्या | |
|---|---|---|---|
| १ | ब्रह्मपुराणम् | १३००० | । |
| २ | पद्मपुराणम् | ५५००० | । |
| ३ | विष्णुपुराणम् | २३००० | । |
| ४ | वायुपुराणम् | २४००० | । |
| ५ | श्रीमद्भागवतपुराणम् | १८००० | । |
| ६ | नारदपुराणम् | २५००० | । |
| ७ | मार्कण्डेयपुराणम् | ९००० | । |
| ८ | अग्निपुराणम् | १६००० | । |
| ९ | भविष्यपुराणम् | २४५०० | । |
| १० | ब्रह्मवैवर्तकपुराणम् | १८००० | । |
| ११ | लिङ्गपुराणम् | ११००० | । |
| १२ | वाराहपुराणम् | २४००० | । |
| १३ | स्कन्दपुराणम् | ८११०० | । |
| १४ | वामनपुराणम् | १०००० | । |
| १५ | कूर्मपुराणम् | १८००० | । |
| १६ | मत्स्यपुराणम् | १४००० | । |
| १७ | गरुडपुराणम् | १८००० | । |
| १८ | ब्रह्माण्डपुराणम् | १२२०० | । |
| | | ----- | |
| | | ४१३८०० | |

अनेन प्रकारेण समस्तेषु पुराणेषु श्लोकानां संख्या अष्टशतोत्तरत्रयोदशसहस्राधिकचतुर्लक्ष (४१३८००) श्लोकाः सन्ति , इत्थमधगाधे

पुराणसमुद्रे किं किं वर्णनमस्ति ? इति समेषां जिज्ञासाशान्तये संक्षेपेण पुराणेषु वर्ण्यविषयः प्रस्तूयते ।

२.१३ पुराणेषु वर्ण्यविषयः ।

प्रकरणेऽस्मिन् समेषां पुराणानां वर्ण्यविषयो लिखितो वर्तते, अनेन प्रकारेण सर्व्वेषां पुराणानां परिचयं त्रयोदशप्रकरणेषु प्रदाय पुराणेषु वर्ण्यविषयो लिखितो वर्तते ।

## प्रकरणम् ३ सांख्ययोगवेदान्तपदस्य निर्वचनम् ।

३.१ प्रस्तावना ।

भारतीयदर्शनस्य क्षेत्रे सांख्यदर्शनस्याऽऽस्तिकदर्शनरूपे विशिष्टमेकं स्थानमस्ति, सांख्यदर्शनस्य वैदिकपरम्परामूलकानां सिद्धान्तानां प्राचीनता वर्तते, अतो भवदुःखनिवृत्तये सर्व्वेषामुपायानां रूपेण सांख्यदर्शनस्य शाश्वती उपादेयता तथा ग्राह्यताऽक्षुण्णा वर्तते, अनया रीत्या संसारात्कैवल्यं यावद्विवेचनापूर्णे सांख्यदर्शने नैके व्याख्येयाः सिद्धान्ताः सन्ति ।

३.२ सांख्यपदस्य निर्वचनम् ।

सांख्यपदस्य पाणिनीयव्याकरणदृष्ट्या निर्वचनम्भवति यद् - संख्यानमिति सांख्यमिति विग्रहे समुपसर्गात् 'चक्षिङ्-व्यक्तायां वाचि[1]' इति धातोः 'आतश्चोपसर्गे[2]' इति पाणिनीयसूत्रेण अङ्प्रत्यये, ङित्त्वात् 'आतो लोप इटि च[3]' इति पाणिनीयसूत्रेण धातोराकारस्य लोपे, स्वादिकार्य्ये स्त्रीत्वविवक्षायां 'संख्या' इति शब्दो निष्पद्यते, संख्यायाम्भवमिति सांख्यम् ।

३.३ सांख्यपदस्य विविधा अर्थाः ।

सामान्यतया सांख्यशब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति यद् - ज्ञानम् , गणना । महाभारतकारोऽपि विविधान् अर्थान् लिखति यद् -

---

1 अदादिधातुः १०८७

2 पा. सू. ३।३।१०६

3 पा. सू. ६।४।६४

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।

तत्त्वानि च चतुर्विंशत्तेन सांख्याः परिकीर्तिताः[१] ।।

परिसंख्यादर्शनम्[२] ।

मीमांसादर्शने पारिभाषिकोऽर्थः प्रदत्तो वर्तते यद् - निषेध्यविषयस्य साधनरूपे विधानम् । सांख्यदर्शनस्य लक्ष्यं पुरुषतत्त्वस्य ज्ञानमस्ति, तथा प्रकृत्यादीनि चतुविंशतितत्त्वानि निषेध्यानि सन्ति, किन्तु एतैनिषेध्यतत्त्वैः पुरुषस्य विवेकज्ञानम्भवति । सांख्यसूत्रस्य प्रसिद्धो भाष्यकारो विज्ञानभिक्षुर्महाभारतस्य परिसंख्यानं तथा पानपरकमित्यर्थं स्वीकुर्व्वाणो लिखति यत् -

सम्यग्विवेकेनात्मकथनम्[३] ।

इत्थन्नेकेषां विदुषां सांख्यसूत्रभाष्यकाराणां मतेसांख्यपदस्य विविधा अर्थाः सन्ति ।

३.४ सांख्यमेव योगः ।

३.५ वेदान्तपदस्य निर्वचनम् ।

३.६ विमर्शपदस्य निर्वचनम् ।

३.७ सांख्यदर्शनस्य कर्तृपरिचयः ।

३.८ सांख्यदर्शनस्य भाष्यकाराः ।

३.९ सांख्यदर्शनस्य वर्ण्यविषयः ।

३.१० सांख्यदर्शनस्य लोकोपयोगिता ।

अनेन प्रकारेण 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मम शोधमहानिबन्धस्य दशसूपप्रकरणेषु तृतीयम्प्रकरणं विविच्य मया शोधविषयः सुचारुतया प्रस्थापितो वर्तते, अतो विस्तारभयाद् विशेषमुल्लेखमत्र न करोमि ।

---

1 महाभारतम् १२।३०।६।४३

2 महाभारतम् १२।३०।६।४२

3 सांख्यप्रवचनभाष्य-प्रस्तावना-पृष्ठसंख्या-४

## प्रकरणम् ४ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

४.१ प्रस्तावना ।

४.२ पुराणेषु सांख्यीयतत्त्वपरिगणनम् ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[१] ।।

४.३ पुराणेषु प्रमाणविषयविवेचनम् ।

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम्[२] ।।

४.४ पुराणेषु सत्कार्य्यवादः ।

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्य्यम्[३] ।।

४.५ पुराणेषु गुणनिरूपणम् ।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः[४] ।।

४.६ पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माः ।

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्[५] ।।

४.७ पुराणेषु प्रकृतिपरिणामः ।

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्[६] ।।

---

1 सांख्यकारिका-३
2 सांख्यकारिका-६
3 सांख्यकारिका-९
4 सांख्यकारिका-१२
5 सांख्यकारिका-१०
6 सांख्यकारिका-१६

अनेन प्रकारेण मम शोधमहानिबन्धस्य चतुर्थे प्रकरणे पुराणेषु सांख्यीयतत्त्वपरिगणनम् , प्रमाणविषयविवेचनम् , सत्कार्य्यवादः, गुणनिरूपणम् , व्यक्ताव्यक्तभिन्नधर्म्माः, प्रकृतिपरिणामः-इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र न प्रस्तूयते ।

**प्रकरणम् ५ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।**

५.१ प्रस्तावना ।

५.२ पुराणेषु पुरुषसिद्धिः ।

संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च[1] ।।

५.३ पुराणेषु पुरुषबहुत्ववादः ।

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव[2] ।।

५.४ पुराणेषु पुरुषधर्म्माः ।

तस्माच्च विपर्ययात्सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृमकर्तृभावश्च[3] ।।

५.५ पुराणेषु सृष्टिव्यवस्था ।

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि[4] ।।

५.६ पुराणेषु बुद्धिस्वरूपम् ।

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्[1] ।।

---

[1] सांख्यकारिका-१७
[2] सांख्यकारिका-१८
[3] सांख्यकारिका-१९
[4] सांख्यकारिका-२२

५.७ पुराणेषु अहङ्कारस्वरूपम् ।

अभिमानोऽहङ्कारः तस्माद् द्विविधः प्रवर्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव[2] ।।

अनेन प्रकारेण मम शोधमहानिबन्धस्य चतुर्थे प्रकरणे पुराणेषु पुरुषसिद्धिः, पुराणेषु पुरुषबहुत्ववादः, पुराणेषु पुरुषधर्म्माः, पुराणेषु सृष्टिव्यवस्था, पुराणेषु बुद्धिस्वरूपम् , पुराणेषु अहङ्कारस्वरूपम् - इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र न प्रस्तूयते ।

## प्रकरणम् ६ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

६.१ प्रस्तावना ।

६.२ पुराणेषु इन्द्रियसर्गः ।

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः[3] ।।

६.३ पुराणेषु शून्यवादनिरासः ।

अपवादमात्रमबुद्धानाम्[4] ।।

६.३.१ शिवपुराणे शून्यवादनिरासः ।।

शिवपुराणे शून्यवादनिरासस्य वर्ण्णनं कुर्व्वाणो शिवपुराणकारः श्रीव्यासो लिखति यद् -

सर्वशून्यं निरालम्बं स्वरूपं यत्र चिन्त्यते ।
अभावयोगः स प्रोक्तो येनात्मानं प्रपश्यति[5] ।।

शिवपुराणकारः कथयति यद् - यत्र सर्वशून्यस्य निरालम्बस्वरूपस्य चिन्तनं भवति, स एवाभावयोगः कथितो वर्तते, तेनैव कश्चित्साधक

---

[1] सांख्यकारिका-२३
[2] सांख्यकारिका-२४
[3] सांख्यकारिका-२६
[4] सांख्यप्रवचनभाष्य-१-४५
[5] शिवपुराणम्- ७।२।७३

आत्मानमवलोकयितुं शक्नोति, इत्थं सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

६.४ पुराणेषु गतिकर्मबन्धकारणतानिरासः ।।

न गतिविशेषात् ।।

निष्क्रियस्य तदसम्भवात्[1] ।।

न कर्मणाऽप्यतद्धर्मत्वात्[2] ।।

६.५ पुराणेषु अविद्याखण्डनम् ।

समानः प्रकृतेर्द्वयोः[3] ।।

६.६ पुराणेषु सृष्टिप्रयोजनम् ।

विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य ।।

विरक्तस्य तत्सिद्धेः[4] ।।

६.७ पुराणेषु विवेककृतकृत्यता ।

विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात्[5] ।।

## प्रकरणम् ७ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

७.१ प्रस्तावना ।

७.२ पुराणेषु उपासनाफलम् ।

इतरस्यापि नात्यन्तिकम् ।।

सङ्कल्पितेऽप्येवम् ।।

भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवत्[6] ।।

७.३ पुराणेषु जीवन्मुक्तशरीरावस्थानम् ।

---

1 सांख्यप्रवचनभाष्य-१-४८-४९
2 सांख्यप्रवचनभाष्य-१-५१
3 सांख्यप्रवचनभाष्य-१-६९
4 सांख्यप्रवचनभाष्य-२-१।२
5 सांख्यप्रवचनभाष्य-३-८४
6 सांख्यप्रवचनभाष्य-३।२७-२९

जीवनमुक्तश्च ।।

उपदेश्योपदेष्टृत्वात् तत्सिद्धिः[1] ।।

७.४ पुराणेषु वेदानां स्वतःप्रामाण्यम् ।

अपौरुषेयत्वं तत्कर्तुः पुरुषस्याभवात्[2] ।।

७.५ पुराणेषु शरीरपञ्चभूतत्वनिरासः ।

न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्[3] ।।

७.६ पुराणेषु मोक्षब्रह्मरूपता ।

समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता[4] ।।

सर्व्वेषु पुराणेषु मोक्षब्रह्मरूपताया वर्ण्णनं कृतमस्ति, विस्तारभयादत्र न क्रियते ।

७.७ पुराणेषु देहविभागः ।

न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ।।

त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः[5] ।।

७.८ पुराणेषु आत्मसिद्धिः ।

अस्त्यात्मा नास्तित्वसाधनाभावात् ।।

देहादिव्यतिरिक्तोऽसौ वैचित्र्यात्[6] ।।

७.८.१ श्रीविष्णुपुराणे आत्मसिद्धिः ।

श्रीविष्णुपुराणे शरीरादिव्यतिरिक्तस्यात्मनोऽस्तित्वसिद्धये आत्मसिद्धिवर्ण्णनं कुर्व्वाणो विष्णुपुराणकारः श्रीव्यासो लिखति यद् –

त्वं किमेतच्छिरः किन्तु शिरस्तव तथोदरम् ।

1 सांख्यप्रवचनभाष्य–३।७८–७९
2 सांख्यप्रवचनभाष्य–५।४५
3 सांख्यप्रवचनभाष्य–५।१०२
4 सांख्यप्रवचनभाष्य–५।१०६
5 सांख्यप्रवचनभाष्य–५।१२४–१२५
6 सांख्यप्रवचनभाष्य–६।१–२

किमु पादादिकं त्वं वै तवैतद्धि महीपते ।।
समस्तावयवेभ्यस्त्वं पृथग्भूप व्यवस्थितः ।
कोऽहमित्यत्र निपुणो भूत्वा चिन्तय पार्थिव[१] ।।

इत्थं श्रीविष्णुपुराणस्य द्वितीयांशे आत्मविषयकं वर्ण्णनं कृतमस्ति, श्रीमद्भागवतपुराणादिषु सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

७.९ पुराणेषु बन्धमोक्षकारणम् ।

परधर्मत्वेऽपि तत्सिद्धिरविवेकात् ।।
अनादिरविवेकोऽन्यथा दोषद्वयापत्तेः[२] ।।

७.९.१ कूर्मपुराणे बन्धमोक्षकारणम् ।

कूर्मपुराणे बन्धस्य तथा मोक्षस्य वर्ण्णनं कूर्मपुराणकारः श्रीव्यासो लिखति यद् -

दाहाय नानलो वह्नेर्नापः क्लेदाय चाम्भसः ।
तद् द्रव्यमेव तद् द्रव्यविकाराय न वै यतः ।।
किञ्च स्वयं विकारित्वे मोक्षो नैवोपपद्यते ।
स्वयं मोहविकारेण पुनर्बन्धप्रसङ्गतः[३] ।।

यथा - अग्निः प्रज्वलनाय न भवति, तथैव जलं क्लेदाय न भवति, कथं यद् - तदेव द्रव्यं तस्यैव द्रव्यस्य विकाराय न भवति, अनेन प्रकारेण यः स्वयं विकारी वर्तते, तस्य मोक्षः कदापि भवितुन्नार्हति, यदा मोक्षो न भवति, तस्य तस्य बन्धनस्य प्रसङ्गो भवति, इत्थं कूर्मपुराणे बन्धमोक्षकारणस्य विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

७.१० पुराणेषु पुरुषबहुत्वव्यवस्था ।

---

1 श्रीविष्णुपुराणम्- २।१३।९८-९९
2 सांख्यप्रवचनभाष्य-६।११-१२
3 कूर्मपुराणम्- २।२।१२-१३

पुरुषबहुत्वं व्यवस्थातः[१] ।।

७.११ पुराणेषु ज्ञानमेव मुक्तिकारणम् ।

लोकस्य नोपदेशात्सिद्धिः पूर्ववत् ।।

पारम्पर्येण तत्सिद्धौ विमुक्तिश्रुतिः[२] ।।

७.१२ पुराणेषु अदृष्टकारणनिराकरणम् ।

अदृष्टद्वारा चेदसम्बद्धस्य तदसम्भवाज्जलादिवदङ्कुरे[३] ।।

७.१३ पुराणेषु संयोगमात्रेण भोक्तुरधिष्ठातृत्वम् ।

निर्गुणत्वात्तदसम्भवादहङ्कारधर्मा ह्येते[४] ।।

७.१४ पुराणेषु जीवस्य सिद्धौ अन्वयव्यतिरेकप्रमाणम् ।

विशिष्टस्य जीवत्वमन्वयव्यतिरेकात्[५] ।।

७.१५ पुराणेषु प्रकृतिपुरुषयोः स्वस्वामिभावस्य अनादित्वम् ।

कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिर्बीजाङ्कुरवत्[६] ।।

## प्रकरणम् ८ सांख्यदर्शनस्य महिमा ।

८.१ सांख्यदर्शनस्य स्रोतः ।

८.२ सांख्यदर्शनस्य परम्परा ।

८.३ सांख्यदर्शने द्वन्द्वात्मको दृष्टिकोणः ।

८.४ सांख्यदर्शनस्य तत्त्वविवेचनम् ।

८.५ सांख्यदर्शनेनैव भगवत्प्राप्तिः ।

८.६ सांख्यदर्शनेनैव भवबन्धनमुक्तिः ।

८.७ सांख्यदर्शनेनैव इष्टसिद्धिः ।

---

1 सांख्यप्रवचनभाष्य-६।४७
2 सांख्यप्रवचनभाष्य-६।५७-५८
3 सांख्यप्रवचनभाष्य-६।६१
4 सांख्यप्रवचनभाष्य-६।६२
5 सांख्यप्रवचनभाष्य-६।६३
6 सांख्यप्रवचनभाष्य-६।६७

अनेन प्रकारेण मदीये पुराणेषु सांख्ययोगवेदान्तविमर्शनामके विषये मया सर्व्वाणि पुराणानि हृदि निधाय सांख्ययोगवेदान्तस्य विमर्श कृतो वर्तते ।

प्रकरणम् ९ उपसंहारः ।

मदीये **‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’** इति महाशोधनिबन्धस्य विषये संक्षिप्ताक्षरज्ञानाय संक्षिप्ताक्षरपरिचयं प्रदाय तत्तत्सन्दर्भग्रन्थानां सूची प्रदत्ताऽस्ति । भारतीयसंस्कृतेर्मार्गावरोधका अनेके विघ्ना आगतास्तथाऽपि न चलितत्वमागतम् । विरुद्धानि यान्यपि बाह्यतत्त्वानि समागतानि तानि सर्वाणि स्वाञ्चले संस्कृत्या समाहितानि सन्ति । मया विलिखितः शोधमहानिबन्धोऽयं विशेषरूपेण पुराणजिज्ञासूनां कृते महानुपकारको भविष्यति, मुख्यतया शोधमहाप्रबन्धोऽयं नवसु (९) प्रकरणेषु विभक्तोऽस्ति, अन्ते च शोधप्रबन्धलेखने गृहीतसाहाय्यानां शिष्टविशिष्टसन्दर्भग्रन्थानां सन्दर्भग्रन्थसूची, तेषां प्रकाशनसंस्थाननिर्देशपुरस्सरं प्रस्थापितं वर्तते । तथाऽपि –

क्वाऽतिगम्भीरगीर्वाणी लेखनं क्वाऽस्म्यहं पुनः ।
गुरुदेवप्रसादेन[1] तथाऽपि पारगोऽभवम् ॥

अस्मिन् शोधप्रबन्धे प्रदत्तैर्नवप्रकरणैः समस्तानां ज्ञानजलपिपासूनां पिपासा काचिच्छान्ता भविष्यति, एवं ज्ञानजिज्ञासूनां संस्कृतपारावारीणां कृते शोधमहाप्रबन्धोऽयं पथप्रदर्शको भविष्यतीति शम् । यद्यपि ‘सगुणो निर्गुणो वाऽपि स्वलेखः कस्य न प्रियः’ इति श्रीगोस्वामिना तुलसीदासेन कथितमस्ति, तथाऽपि – ‘आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्’ इति कविकुलकमलदिवाकरस्य श्रीकालिदासस्य वचनानुसारं संस्कृतविद्याजीवातूनां सर्वेषां विदुषां समक्षमिमां प्रार्थनां प्रकृत्य **‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’** इति विषयस्य नवभिः प्रकरणैः यथार्थतां यथामति प्रतिपाद्य शोधप्रबन्धसंक्षिप्तिकामिमां पूर्णङ्करोमि यद् –

अदृश्यदोषान्मतिविभ्रमाद्वा यत्किञ्चिदूनं लिखितं मया च ।

[1] डॉ. हरिप्रसाद पाण्डे

तत्सर्वमार्यैः परिशोधनीयं कोपन्न कुर्यात् खलु लेखकस्य ।।

## (३) तृतीयं विधानम्

### आधारभूतसामग्रीमौलिकताविज्ञापकं तृतीयं विधानम् –

प्रस्तुतेऽस्मिन् **'पुराणेषु सांख्ययोगवेदान्तविमर्शः'** इति शोधमहानिबन्धे मया संशोधनात्मको दृष्टिकोणः स्वीकृतः, उद्देश्यसिद्धये प्रमुखतया पुराणग्रन्थानां विशेषरूपेणाऽऽधारो गृहीतः, तत्रावश्यकतानुसारं विभिन्नसंस्कृतग्रन्थानामपि साहाय्यमादाय, शोधमहानिबन्धेऽस्मिन् प्रयुक्ता विषयनिरूपणशैली नूतना सरसा हृद्या च वर्तते ।

शोधमहानिबन्धोऽयम् अपूर्वोऽस्ति । अस्मिन् प्रयुक्तोऽयं विषयः शैली च सर्वथा भिन्ना वर्तते । शोधप्रबन्धदृष्ट्या च अस्य प्रस्तुतिश्चिन्तनञ्च मौलिकमस्ति ।

अस्य शोधमहानिबन्धस्यान्तिमे भाग उल्लिखितानां ग्रन्थानामपि यथापेक्षितमाश्रयं गृहीत्वा समग्रसंशोधनकार्यं समग्रदृष्ट्या सर्वाङ्गीणोत्कृष्टं यथा स्यात्, तथा यथाशक्ति यथामति यथाशक्ति च कृतप्रयत्नोऽस्मि ।

अतोऽहम्प्रतिजाने यच्छोधप्रबन्धस्यास्य मौलिकतामावहन् तद्विषयकं सम्पूर्णम् उत्तरदायित्वं धारयामि ।

विदुषामाश्रावकः

उपाध्याय गिरधर

(पुराणाचार्यः)

M.9879594144

## संक्षिप्ताक्षरपरिचयः

| क्रमः | संक्षिप्ताक्षराणि | | ग्रन्थनाम |
|---|---|---|---|
| १ | ऋ. वे. | = | ऋग्वेदः |
| २ | नी. शतकम् | = | नीतिशतकम् |
| ३ | पा. सू. | = | पाणिनीयसूत्राष्टाध्यायी |
| ४ | पु. विमर्शः | = | पुराणतत्त्वविमर्श |
| ५ | ब्रह्म. पुराणम् | = | ब्रह्मवैवर्तपुराणम् |
| ६ | ब्र. पुराणम् | = | ब्रह्माण्डपुराणम् |
| ७ | मा. पुराणम् | = | मार्कण्डेयपुराणम् |
| ८ | मा. सू. | = | माहेश्वरसूत्रम् |
| ९ | वै. सि. कौ. | = | वैयाकरणसिद्धान्तकौमुदी |
| १० | वै. सा. और सं. | = | वैदिक साहित्य और संस्कृति |
| ११ | व्या. भाष्यम् | = | व्याकरण-महाभाष्यम् |
| १२ | शु. य. संहिता | = | शुक्लयजुर्वेद-संहिता |
| १३ | श्री. गीता | = | श्रीमद्भगवद्गीता |
| १४ | श्रीमद्भा. पुराणम् | = | श्रीमद्भागवतपुराणम् |
| १५ | श्रीसु. र. भा. | = | श्रीसुभाषितरत्नभाण्डागारम् |
| १६ | सं. सा. का इति. | = | संस्कृत साहित्य का इतिहास |

## ।। सन्दर्भग्रन्थसूचिः ।।


| क्रमः | ग्रन्थनाम | लेखकादिविवरणम् |
|---|---|---|
| १ | अग्निपुराणम् | अनुवादकौ - डॉ. तारिणीश झा<br>- डॉ. घनश्याम त्रिपाठी<br>शिन्दी साहित्य सम्मेलन प्रयाग<br>१२ सम्मेलन मार्ग इलाहाबाद ३<br>तृतीयसंस्करण - वि. स. २००७ |
| २ | कूर्मपुराणम् | भाषन्तरकर्ता<br>श्री शान्तिलाल ठाकर<br>सस्तु साहित्य वर्धक कार्यालय<br>मुम्बइ इ. स. १९८२ |
| ३ | कूर्मपुराणम् | काशीराज ट्रस्ट वाराणसी<br>ई. सं. १९७२ |
| ४ | कूर्मपुराणम् | भाषन्तरकर्ता<br>श्रीगिरिजाशङ्कर मयाशङ्कर शास्त्री<br>सस्तु साहित्य वर्धक कार्यालय<br>मुम्बइ वि. स. २०१८ |
| ५ | गरुडपुराणम् | चौखम्बासंस्कृतसंस्थान<br>वाराणसी ई. सं. १९६४ |
| ६ | चाणक्यनीतिः | रूपान्तरकर्ता ओमप्रकाश शर्मा<br>मनोज पॉकेट बुक्स दिल्ली |

| | | |
|---|---|---|
| ७ | नारदपुराणम् | क्षेमराजकृष्णदास<br>मुम्बई ई. स. १९७५ |
| ८ | नारदपुराणम् | पं. श्रीराम जी शर्मा आचार्य<br>प्रथमो भागः संस्कृति संस्थान<br>बरेली ई. स. १९९४ |
| ९ | नारदपुराणम् | पं. श्रीराम जी शर्मा आचार्य<br>द्वितीयो भागः संस्कृति संस्थान<br>बरेली ई. स. १९९४ |
| १० | नारदपुराणम् | भाषन्तरकर्ता श्रीवासुदेव म. जोषी<br>सस्तु साहित्य वर्धक कार्यालय<br>मुम्बइ वि. स. २०२५ |
| ११ | नीतिशतकम् | लेखकः श्रीभर्तृहरिः<br>चौखम्बासंस्कृतसीरीजआफिस<br>वाराणसी संस्करणम् - २<br>वि. सं. २०५१ |
| १२ | न्यायदर्शनम् | चौखम्बासंस्कृतसीरीजआफिस<br>वाराणसी संस्करणम् - ३<br>वि. सं. २०१८ |
| १३ | पद्मपुराणम् | भाषान्तरकर्ता -<br>गिरिजाशंकर मयाशंकर शास्त्री<br>सस्तु साहित्य वर्धक कार्यालय<br>मुंबइ - २<br>आवृत्ति - २ वि. सं. २०४२ |

| | | |
|---|---|---|
| १४ | पुराणतत्त्वविमर्श | लेखकः पं. थानेशचन्द्र शास्त्री<br>परिमल पब्लिकेशन्स<br>दिल्ली ई. स. २००१ |
| १५ | पुराणकथाङ्क | सम्पादकः राधेश्याम खेमका<br>कार्यालय गीताप्रेस<br>गोरखपुर वि. स. २०४६ |
| १६ | ब्रह्मपुराणम् | हिन्दी साहित्य सम्मेलन<br>वाराणसी ई. सं. १९७५ |
| १७ | ब्रह्मवैवर्तपुराणम् | क्षेमराजकृष्णदास<br>मुम्बई ई. स. १९६३ |
| १८ | ब्रह्माण्डपुराणम् | मोतीलाल बनारसीदास<br>वाराणसी ई. सं. १९६३ |
| १९ | भविष्यपुराणम् | क्षेमराजकृष्णदास<br>मुम्बई ई. स. १९५६ |
| २० | श्रीमद्भागवतपुराणम् | प्रकाशकः गोविन्दभवन<br>कार्यालय गीताप्रेस गोरखपुर<br>५६वाँ संस्करण - वि. स. २०६३ |
| २१ | श्रीमत्स्यपुराणम् | व्याख्याकर्त्री - डॉ. श्रद्धा शुक्ला<br>प्रथमो भागः नाग पब्लिशर्स<br>जवाहर नगर दिल्ली<br>प्रथम संस्करण ई. स. २००४ |

| | | |
|---|---|---|
| २२ | श्रीमत्स्यपुराणम् | व्याख्याकर्त्री - डॉं. श्रद्धा शुक्ला<br>द्वितीयो भागः नाग पब्लिशर्स<br>जवाहर नगर दिल्ली<br>प्रथम संस्करण ई. स. २००४ |
| २३ | मनुस्मृतिः | सम्पादकः<br>श्री पं. गोपालशास्त्री नेन<br>चौखम्बासंस्कृतसंस्थान<br>वाराणसी<br>चतुर्थसंस्करण -वि. स. २०४९ |
| २३ | मार्कण्डेयपुराणम् | नाग पब्लिर्स दिल्ली<br>ई. स. १९८१ |
| २४ | लिङ्गपुराणम् | मोतीलाल बनारसीदास<br>वाराणसी ई. सं. १९८० |
| २५ | वराहपुराणम् | काशीराज ट्रस्ट<br>वाराणसी ई. सं. १९८१ |
| २६ | वामनपुराणम् | काशीराज ट्रस्ट<br>वाराणसी ई. सं. १९८१ |
| २७ | वामनपुराणम् | भाषन्तरकर्ता<br>श्री भाइशङ्कर पुरोहित<br>सस्तु साहित्य वर्धक कार्यालय<br>मुम्बइ वि. स. २०३९ |

| | | |
|---|---|---|
| २८ | विष्णुपुराणम् | प्रकाशकः हनुमानप्रसाद पोद्दार कार्यालय गीताप्रेस गोरखपुर पञ्चम संस्करण – वि. स. २०१८ |
| २९ | वैयाकरणसिद्धान्तकौमुदी | लेखकः श्रीमद्भट्टोजिदीक्षितः चौखम्बा संस्कृत सीरीज वाराणसी १ पञ्चमसंस्करणम् इ. स. २०३४ |
| २९ | वैदिक साहित्य और संस्कृति | लेखकः बलदेव उपाध्याय वाराणसी च. आ. इ. स. १९७३ |
| ३० | व्याकरण–महाभाष्यम् | सम्पादकः वेदाचार्यः श्रीवेदव्रतः हरयाणासाहित्यसंस्थानम् गुरुकुल झज्जर (रोहतक) प्रथमं संस्करणम् – ई. स.१९६२ |
| ३१ | स्कन्दपुराणम् | मोतीलाल बनारसीदास वाराणसी ई. सं. १९६३ |
| ३२ | शिवपुराणम् | नाग पब्लिर्स दिल्ली ई. स. १९८१ |
| ३३ | शुक्लयजुर्वेद–संहिता | सम्पादकः या. स. प. वेणीरामशर्मा गौड चौखम्बा ओरियन्टालिया वाराणसी दिल्ली १९वाँ संस्करण – ई. स. १९८३ |

| | | |
|---|---|---|
| ३४ | श्रीमद्भगवद्गीता | प्रकाशकः गोविन्दभवन<br>कार्यालय गीताप्रेस<br>गोरखपुर<br>१९वाँ संस्करण - वि. स. २०५४ |
| ३५ | श्रीसुभाषितरत्नभाण्डागारम् | लेखकः श्रीकाशिनाथशर्मा<br>ईस्टर्न बुक लिंकर्स<br>दिल्ली - ११०००७<br>संस्करणम् - २००३ |
| ३६ | संस्कृत साहित्य का इतिहास | लेखकः आचार्य बलदेव<br>उपाध्याय ( काव्य-खण्ड)<br>शारदा मन्दिर वाराणसी<br>वि. सं. २०३० |

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

दिनाङ्कः २५-०१-२०१७

वासरः सौम्यवासरः

मान्याः कुलसचिवमहोदयाः

एम. एस. युनिवर्सिटी

बडौदानगरम्

विषयः -शोधमहाप्रबन्धसारप्रस्तुतीकरणविषयः

सादरं जयश्रीकृष्णः

सविनयन्नम्रनिवेदनमस्ति यद् विद्यावारिधिः (Ph.D.) इत्युपाधिकामुकाऽहं श्री सौराष्ट्रयुनिवर्सिटी (राजकोटम्) इति विश्वविद्यालये **''पुराणेषु सांख्ययोगवेदान्तविमर्शः'** इति महाशोधविषयस्य शोधसारं **(Synopsis)** प्रस्तौमि ।

इमं महाशोधसारं स्वीकृत्य यथाकार्य्यं करिष्यन्ति, इत्याशां प्रस्थाप्य पत्रमिदं समाप्नोमि ।

**भावदीयः**

उपाध्याय गिरधर

(पुराणाचार्यः)

M.9879594144